 ISSN: 2349-6002

# वैदिकज्ञानपरम्परा, उपनिषद्दर्शनं भारतीयज्ञानशास्त्रं च

(Indian Knowledge Systems, Upanishadic Thought, and Indian Epistemology)

प्रा. कल्पेश डी. दवे

*सहायक प्राध्यापक (संस्कृतविभागाध्यक्ष), सरकारी विनयन कॉलेज, तलाजा, भावनगर- 364140*

doi.org/10.64643/IJIRTV12I8-190972-459

## १. प्रस्तावना

भारतीयसंस्कृतौ ज्ञानं जीवनस्य केन्द्रीयतत्त्वं मन्यते। "सा विद्या या विमुक्तये" इति सिद्धान्तः भारतीयदार्शनिकचिन्तनस्य मूलाधारः अस्ति । यत्र पाश्चात्यदर्शनपरम्परायां ज्ञानं बाह्यजगतः विश्लेषणपर्यन्तं सीमितं दृश्यते, तत्र भारतीयपरम्परायां ज्ञानं आत्मानुभवेन सह अविच्छिन्नरूपेण सम्बद्धं वर्तते । वैदिकपरम्परायां ज्ञानं श्रवण–मनन–निदिध्यासनक्रमेण अनुभवसिद्धं भवति।

वैदिकपरम्परायां ज्ञानं न केवलं तर्कप्रधानं भवति, अपि तु साधनासिद्धं, जीवनानुभवेन परिपुष्टं च भवति । श्रवणेन शास्त्रवाक्यानां ग्रहणं, मननेन तेषां युक्तिसङ्गतपरिशीलनं, निदिध्यासनेन तु तत्त्वस्य आत्मसाक्षात्कारः साध्यते । एषः त्रिविधः साधनक्रमः भारतीयज्ञानदर्शनस्य वैशिष्ट्यं दर्शयति ।

अत्र ज्ञानं कर्मात् पृथक् न विद्यते, अपि तु कर्मस्य शुद्ध्यर्थं, उपासनेन च मनसः एकाग्रतासिद्ध्यर्थं ज्ञानस्य आवश्यकता स्वीक्रियते । अतः वैदिकचिन्तनं कर्म उपासना–ज्ञानानां समन्वितरूपेण विवेच्यते । उपनिषदः अस्य ज्ञानपरम्परायाः सर्वोच्चं दार्शनिकस्वरूपं प्रतिपादयन्ति । अविद्याजन्यबन्धनात् विद्याजन्यस्वातन्त्र्यं प्रति मानवजीवनस्य यात्रां उपनिषत्सु सूक्ष्मतया निरूपितं दृश्यते । तस्मात् भारतीयदर्शनपरम्परायां ज्ञानं केवलं बौद्धिकोपलब्धिरूपं न, किन्तु जीवनपरिवर्तनस्य, आन्तरिकशुद्धेः, मोक्षप्राप्तेः च अनिवार्यं साधनं मन्यते । अस्मिन् सन्दर्भे वैदिकज्ञानपरम्परायाः उपनिषद्दर्शनस्य च दार्शनिकमहत्त्वं भारतीयज्ञानशास्त्रस्य आधाररूपेण विचारयितुं अत्यन्तं आवश्यकं वर्तते ।

## २. वैदिकज्ञानपरम्परायाः स्वरूपम्

वेदाः अपौरुषेयाः इति भारतीयदर्शनपरम्परायां सर्वसम्मतं मतम् अस्ति । ऋषयः वेदानां कर्तारः न सन्ति, अपि तु मन्त्रद्रष्टारः सन्ति । ऋग्वेदे प्रकृतिपूजा, यजुर्वेदे यज्ञकर्म, सामवेदे उपासना, अथर्ववेदे सामाजिकजीवनस्य विवेचनं दृश्यते।

मुण्डकोपनिषदि विद्याद्वयस्य विभागः प्रतिपाद्यते-

द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो
वदन्ति परा चैवापरा च ॥[1]

Dve vidye veditavye iti ha sma yad
brahmavido vadanti ।
parā caivāparā ca ।।

अत्र अपरा विद्या लौकिकज्ञानं, परा विद्या ब्रह्मविद्या इति विवेचनं कृतम् ।

---

[1] मुण्डकोपनिषद् १.१.४

अत्र अपरा विद्या नाम वेदाङ्गानि, शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषम् इत्यादीनि, तथा धर्मशास्त्राणि, इतिहासनिरूपणानि, पुराणानि च अन्तर्भवन्ति । एषा विद्या व्यवहारोपयोगी, सामाजिकव्यवस्थायाः नियामिका, धर्माचरणस्य आधारभूता च वर्तते। लौकिकजीवनस्य सुव्यवस्थापनार्थं अपरा-विद्यायाः अत्यन्तं महत्त्वं विद्यते, तथापि सा आत्मतत्त्वस्य साक्षात्कारं साधयितुं पर्याप्ता न भवति इति उपनिषदाम् अभिप्रायः।

परा विद्या तु ब्रह्मविद्यारूपा, या आत्मज्ञानस्य प्रत्यक्षसाधनं मन्यते ।

तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमन्विताय।
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो
ब्रह्मविद्याम् ॥[2]

इति मुण्डकोपनिषद्वाक्येन पराविद्यायाः स्वरूपं निर्दिष्टम् अस्ति । एषा विद्या न ग्रन्थाध्ययनमात्रेण लभ्यते, अपि तु गुरु-उपदेशेन, साधनाचतुष्टयसम्पत्त्या, ध्यानानुभवेन च साध्यते । पराविद्यया जीवः स्वस्वरूपं ज्ञात्वा अज्ञानबन्धनात् विमुक्तो भवति ।

एवं वेदिकज्ञानपरम्परायां ज्ञानं केवलं सूचनासञ्चयरूपं न, अपि तु जीवनपरिष्कारस्य साधनरूपं भवति । धर्मः, अर्थः, कामः, मोक्षः इति पुरुषार्थचतुष्टयं अपि अस्याः ज्ञानपरम्परायाः अन्तर्गतं सम्यग्विवेचितं दृश्यते । धर्मः सामाजिकनैतिकव्यवस्थां नियच्छति, अर्थकामौ जीवनस्य साधनरूपेण स्वीक्रियन्ते, मोक्षः तु ज्ञानस्य परमलक्ष्यरूपेण प्रतिष्ठाप्यते ।

अतः वेदिकज्ञानपरम्परा समग्रदृष्ट्या मानवजीवनस्य सर्वाङ्गीणविकासं लक्ष्यीकृत्य प्रवृत्ता इति निष्कर्षः स्पष्टीभवति । अस्याः परम्परायाः दार्शनिकगाम्भीर्यं, जीवनोपयोगिता च भारतीयदर्शनस्य वैशिष्ट्यं प्रकाशयति ।

### ३. उपनिषद्दर्शनम्

उपनिषदः वेदिकज्ञानपरम्परायाः दार्शनिकशिरोमणयः सन्ति । कर्मकाण्डप्रधानविचारात् ज्ञानकाण्डप्रधानदर्शनं प्रति उपनिषदां महत्त्वपूर्णः योगदानः अस्ति ।

उपनिषदां मूलविषयाः-

- आत्मा
- ब्रह्म
- संसारः
- मोक्षः

छान्दोग्योपनिषदि महावाक्यं प्रतिपाद्यते-

तत्त्वमसि, श्वेतकेतो ![3]

Tattvam asi śvetaketo ।

अस्य वाक्यस्य तात्पर्यं जीवात्मा एव ब्रह्मेति ऐक्यबोधः अस्ति । अविद्यया भिन्नत्वबुद्धिः, विद्यया ऐक्यसाक्षात्कारः इति उपनिषद्दर्शनस्य केन्द्रीयसिद्धान्तः।

उपनिषद्दर्शनं भारतीयदार्शनिकपरम्परायाः पराकाष्ठारूपेण स्वीक्रियते । अत्र बाह्यकर्मकाण्डात् अन्तर्मुखचिन्तनस्य संक्रमणं स्पष्टतया दृश्यते । यज्ञकर्मादीनां बाह्यसाधनानां स्थानं अत्र आत्मविचारः, ब्रह्ममीमांसा, तत्त्वज्ञानं च गृह्णाति । उपनिषदः मानवं बाह्योपासना-पथात् अन्तःप्रज्ञापथे नियोजयन्ति, यत्र आत्मसाक्षात्कारः एव मुक्तेः एकमेव साधनं भवति ।

आत्मा न शरीरं, न इन्द्रियाणि, न मनः, न बुद्धिः इति उपनिषदां प्रतिपादनं आत्मतत्त्वस्य सूक्ष्मतां दर्शयति । बृहदारण्यकोपनिषदि "नेति नेति" इति पद्धत्या आत्मस्वरूपस्य निरूपणं कृतम् अस्ति । ब्रह्म तु सच्चिदानन्दरूपं, सर्वव्यापकं, निर्गुणं, निर्विकारं च

[2] मुण्डकोपनिषद्- १/२/१३

[3] छान्दोग्योपनिषद् ६।८।७

 ISSN: 2349-6002

मन्यते। आत्मा एव ब्रह्मेति उपनिषदां मूलसिद्धान्तः अद्वैतदर्शनस्य आधारशिलारूपेण प्रतिष्ठितः।

संसारः अविद्याजन्यः इति उपनिषदां मतम् अस्ति । नामरूपभेदेन यत् जगत् अनुभवतः दृश्यते, तत् तत्त्वतः ब्रह्मणः एव अभिव्यक्तिरूपं भवति । जीवः अविद्यावशात् आत्मानं देहादिभिः तादात्म्येन मन्यते, तस्मात् जन्ममरणचक्रे बद्धः भवति । विद्यया तु सः स्वस्वरूपं ज्ञात्वा संसारबन्धनात् विमुच्यते।

मोक्षः उपनिषद्दर्शनस्य परमलक्ष्यम् अस्ति । स न नवीनप्राप्तिः, अपि तु स्वस्वरूपस्य पुनःस्मरणरूपः एव । मोक्षे न गमनं, न परिवर्तनं, अपि तु अज्ञाननिवृत्तिमात्रं भवति इति उपनिषदां सूक्ष्मप्रतिपादनम् अस्ति । अतः उपनिषद्दर्शनं केवलं दार्शनिकचिन्तनरूपं न, अपि तु आत्मपरिवर्तनस्य, जीवनशुद्धेः, आन्तरिकस्वातन्त्र्यस्य च सशक्तमार्गं प्रदर्शयति ।

### ४. अविद्या–विद्याविचारः

कठोपनिषदि अविद्यायाः स्वरूपं तीव्रशब्दैः निरूपितम्-

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।

दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥[4]

Avidyāyām antare vartamānāḥ
svayaṃ dhīrāḥ paṇḍitam
manyamānāḥ ।
dandramyamāṇāḥ pariyanti mūḍhāḥ
andhenaiva nīyamānā yathāndhāḥ ।।

विद्या आत्मज्ञानरूपा, अविद्या आत्मविस्मरणरूपा इति उपनिषदां स्पष्टप्रतिपादनम् अस्ति ।

अस्य मन्त्रस्य आशयः अज्ञानस्य गाम्भीर्यं तथा तस्य मानवीयजीवने दुष्परिणामं सूक्ष्मतया प्रकाशयति । अविद्यायां प्रवृत्ताः जनाः स्वयमेव आत्मानं विद्वांसं मन्यन्ते, परन्तु तत्त्वतः ते मूढाः भवन्ति । यथा अन्धः अन्धेन नीयमानः मार्गभ्रष्टो भवति, तथैव अविद्योपेताः जनाः अज्ञानपरम्परया संसारचक्रे भ्रमन्ति । अत्र उपनिषत् केवलं अज्ञानस्य दोषान् न दर्शयति, अपि तु मिथ्याज्ञानजन्य अहङ्कारस्य अपि कठोरनिन्दां करोति ।

अविद्या न केवलं बौद्धिकाभावः, किन्तु आत्मस्वरूपाविवेकः इति उपनिषदां मतम् अस्ति । जीवः यदा आत्मानं देह–इन्द्रिय–मनसां तादात्म्येन पश्यति, तदा सः अविद्यावशः भवति । एषा अविद्या काम–क्रोध–लोभादिदोषानां कारणरूपेण संसारबन्धनं दृढं करोति । अतः अविद्या जीवनस्य दुःखमूलं मन्यते ।

विद्या तु आत्मज्ञानरूपा, या जीवस्य वास्तविकस्वरूपस्य प्रकाशिका भवति । सा गुरूपदेशेन, शास्त्रश्रवणेन, मनननिदिध्यासनाभ्यासेन च प्राप्ता भवति । विद्यया जीवः नूतनं किञ्चिद् न प्राप्नोति, अपि तु स्वस्वरूपमेव पुनः अवगच्छति । यथा घटाकाशस्य भेदः घटभङ्गे निवर्तते, तथैव आत्मज्ञानोत्पत्तौ जीवब्रह्मभेदबुद्धिः नश्यति ।

एवं उपनिषद्दर्शनं अविद्याविद्ययोः भेदं केवलं दार्शनिकविचाररूपेण न, अपि तु जीवनपरिवर्तनस्य व्यावहारिकसाधनरूपेण प्रतिपादयति । अविद्यानिवृत्तिः एव मोक्षः इति उपनिषदां निर्णायकसिद्धान्तः अस्ति । अतः विद्या न केवलं ज्ञानेच्छया प्राप्तव्या, अपि तु मुक्त्यर्थं अनिवार्यतया अवलम्बनीया इति निष्कर्षः उपनिषदां सर्वत्र दृश्यते।

### ५. भारतीयज्ञानशास्त्रम् (Epistemology)

भारतीयदर्शनपरम्परायां ज्ञानस्य यथार्थतां सुनिश्चितुं प्रमाणसिद्धान्तः विकसितः । न्यायदर्शने चत्वारि प्रमाणानि-

---

[4] कठोपनिषद् १/२/५

 ISSN: 2349-6002

1. प्रत्यक्षम्
2. अनुमानम्
3. उपमानम्
4. शब्दः

तत्र शब्दप्रमाणस्य विशेषमहत्त्वं वैदिकपरम्परायां दृश्यते । वेदाः आप्तवाक्यरूपेण शब्दप्रमाणस्य सर्वोच्चस्वरूपं धारयन्ति ।

प्रत्यक्षप्रमाणं इन्द्रियसन्निकर्षजन्यं ज्ञानं प्रदानं करोति । यथार्थवस्तुनः साक्षात् अनुभवः प्रत्यक्षस्य आधारः अस्ति । तथापि इन्द्रियाणि सीमितानि सन्ति, अतः सर्ववस्तुनां ज्ञानं प्रत्यक्षेण एव न सम्भवति । अनुमानप्रमाणं तु हेतु–साध्यसम्बन्धाधारितं भवति, यत्र ज्ञातलक्षणात् अज्ञातवस्तुनः बोधः जायते । अग्निधूमयोः सम्बन्धेन पर्वते वह्निबुद्धिः अनुमानस्य सुप्रसिद्धं दृष्टान्तः अस्ति ।

उपमानप्रमाणं सादृश्याधारितज्ञानस्य साधनं भवति । अपरिचितवस्तुनः ज्ञानं परिचितवस्तुसादृश्येन यदा जायते, तदा उपमानप्रमाणस्य प्रयोगः दृश्यते । एतत् प्रमाणं भाषाव्यवहारे, वस्तुनिर्णये च विशेषतः उपयोगी भवति । शब्दप्रमाणं तु आप्तपुरुषवाक्याद् उत्पादितं ज्ञानं प्रदानं करोति । आप्तः सः यः सत्यवक्ता, दोषरहितः, विषयविशेषज्ञः च भवति ।

वेदिकपरम्परायां शब्दप्रमाणस्य सर्वोच्चस्थानं प्रतिष्ठितम् अस्ति, यतः वेदाः अपौरुषेयाः, कालातीताः, सर्वज्ञतामूलकाः च मन्यन्ते । प्रत्यक्षादीनि प्रमाणानि यत्र सीमां प्राप्नुवन्ति, तत्र शब्दप्रमाणं तत्वज्ञानस्य प्रकाशकं भवति । विशेषतः ब्रह्मतत्त्वं, धर्मः, मोक्षमार्गः च प्रत्यक्षानुमानाभ्यां अगोचराः सन्ति, अतः तेषां ज्ञानं वेदवाक्येन एव सम्भवति इति भारतीयदर्शनपरम्परायाः दृढं मतम् अस्ति।

एवं भारतीयज्ञानशास्त्रं ज्ञानस्य साधनानि केवलं तर्कप्रधानदृष्ट्या न, अपि तु आध्यात्मिकानुभवस्य साधनरूपेण अपि विवेचयति । प्रमाणसिद्धान्तः न केवलं तत्त्वमीमांसायाः अंगरूपेण, अपि तु मुक्तिसाधनस्य मार्गनिर्देशकत्वेन अपि भारतीयदर्शने महत्त्वं वहति। अतः भारतीयज्ञानशास्त्रस्य गाम्भीर्यं, व्यापकता च वैश्विकदार्शनिकपरम्परायां विशेषस्थानं धारयति।

६. आधुनिकवैश्विकसन्दर्भे वैदिकज्ञानम्

आधुनिककाले योगः, ध्यानम्, नैतिकता, पर्यावरणसंरक्षणं, मानसिकस्वास्थ्यविचारः च वैदिकज्ञानपरम्परात् नवप्रेरणां प्राप्नुवन्ति ।

ईशावास्योपनिषदि-

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ॥[5]

Īśāvāsyam idaṁ sarvaṁ
yat kiñca jagatyāṁ jagat ।

इदं वाक्यं आधुनिकपर्यावरणचिन्तनस्य दार्शनिकाधाररूपेण स्वीकर्तुं शक्यते । अस्य मन्त्रस्य भावार्थः सर्वस्य जगतः ईश्वरव्याप्तत्वं प्रतिपादयति । यदा सम्पूर्णं विश्वं ईशावास्यम् इति भाव्यते, तदा मनुष्यस्य उपभोगदृष्टिः संरक्षणदृष्ट्या परिवर्तते । प्रकृतिः केवलं भोगसाधनं न, अपि तु पूजनीयतत्त्वं इति वैदिकदर्शनस्य मूलभावना अत्र प्रकटिता भवति ।

आधुनिकपर्यावरणसङ्कटे यत्र अति-उपभोगः, प्रकृतिशोषणं, औद्योगिकप्रदूषणं च विश्वस्तरे प्रमुखसमस्यारूपेण दृश्यन्ते, तत्र वेदिकज्ञानपरम्परा संयमः, अपरिग्रहः, समत्वबुद्धिः च इति मूल्यतत्वानि प्रतिपादयति । एतानि तत्वानि सततविकाससिद्धान्तस्य दार्शनिकाधाररूपेण स्वीकर्तुं शक्यन्ते ।

[5] ईशोपनिषद्- १

 ISSN: 2349-6002

तथैव योगदर्शनं आधुनिकमानसिकस्वास्थ्यविचारे विशेषमहत्त्वं वहति । पतञ्जलियोगसूत्रेषु प्रतिपादितः चित्तवृत्तिनिरोधः मानसिकशान्तेः मूलाधाररूपेण स्वीक्रियते । अद्यतनमनोविज्ञानशास्त्रे ध्यानाधारिताः पद्धतयः अशान्तिनिवारणाय, आत्मनियन्त्रणाय, भावनासन्तुलनाय च व्यापकतया प्रयुज्यन्ते, यासां दार्शनिकमूलं वैदिकयोगपरम्परायां एव दृश्यते। अतः योगः न केवलं शारीरिकव्यायामरूपेण, अपि तु समग्रमानसिकस्वास्थ्यस्य साधनरूपेण आधुनिककाले प्रतिष्ठितः अस्ति ।

नैतिकदृष्ट्या अपि वैदिकज्ञानपरम्परा वैश्विकसमाजाय मार्गदर्शनं ददाति । सत्यं, अहिंसा, ऋतभावना, कर्तव्यबोधः च मानवव्यवहारस्य मूलाधारतत्त्वानि सन्ति । अद्यतनकाले यत्र मूल्यसङ्कटः, नैतिकस्खलनं, सामाजिकविघटनं च अनुभूयते, तत्र वैदिकदर्शनं आत्मसंयमं, परोपकारभावनां, समन्वयदृष्टिं च उपदिशति । एते मूल्याः केवलं वैयक्तिकजीवनस्य न, अपि तु सामाजिकशान्तेः अपि आधाररूपेण स्वीकरणीयाः सन्ति ।

अतः आधुनिकवैश्विकसन्दर्भे वैदिकज्ञानं केवलं ऐतिहासिकस्मरणरूपेण न, अपि तु व्यवहारोपयोगि, समकालीनसमस्यासमाधानक्षमं च दर्शनरूपेण अवलोकनीयम् अस्ति । विज्ञानस्य, प्रौद्योगिकीस्य च तीव्रविकासे अपि मानवजीवनस्य नैतिकाधारः, आन्तरिकशान्तिः, प्रकृतिसंरक्षणभावना च यदि स्थायिनीयाः स्युः, तर्हि वैदिकज्ञानपरम्परायाः चिन्तनं अनिवार्यतया स्वीकरणीयम् इति निष्कर्षः स्पष्टीभवति ।

७. उपसंहारः

वैदिकज्ञानपरम्परा उपनिषद्दर्शनं च न केवलं प्राचीनभारतीयपरम्परा, अपि तु सार्वकालिकं सार्वभौमिकं च तत्त्वज्ञानम् अस्ति । भारतीयज्ञानशास्त्रं आधुनिकवैश्विकदर्शनसंवादे महत्त्वपूर्णं योगदानं ददाति । आत्मज्ञानं, नैतिकजीवनं, आन्तरिकशान्तिः- एतानि सर्वाणि वैदिकदर्शनस्य स्थानानि सन्ति ।

एतानि तत्वानि मानवजीवनस्य बाह्यप्रगतेः सह आन्तरिकविकासस्य समन्वयम् उपदिशन्ति । यत्र आधुनिकसभ्यता भौतिकसुखस्य अतिरेकं प्रमुखलक्ष्यं कृत्वा मानसिक-असन्तुलनं नैतिकस्खलनं च अनुभवति, तत्र वैदिकदर्शनं संयमः विवेकः आत्मावलोकनं च अनिवार्यसाधनरूपेण प्रतिपादयति । वैदिकज्ञानपरम्परायां मानवः केवलं उपभोक्ता न, अपि तु कर्तव्यबोधयुक्तः उत्तरदायित्वसम्पन्नः च सामाजिकसत्त्वं मन्यते । अतः अस्याः परम्परायाः आधुनिकसमाजे नवीनार्थप्राप्तिः दृढतया सम्भवति । अन्ततः वक्तुं शक्यते यत् वैदिकज्ञानं आधुनिकवैश्विकचिन्तनस्य विरोधी न, अपि तु पूरकं वर्तते । वैज्ञानिकप्रगतेः सह दार्शनिकगाम्भीर्यस्य सन्तुलनं साधयितुं वैदिकदर्शनस्य अत्यन्तं महत्त्वं विद्यते। अतः भारतीयज्ञानशास्त्रं विश्वमानवकल्याणस्य बौद्धिकनैतिकाधाररूपेण स्थायिरूपेण प्रतिष्ठितुं शक्यते ।